# श्री पीताम्बरा (बगलामुखी) कवचम्

—सम्पादक मंडल

**श्री भैरवी उवाच—**

श्रुत्वा च बगलापूजां स्तोत्रं चापि महेश्वर।

इदानीं श्रोतुमिच्छामि कवचं वद में प्रभो।।1।।

वैरिनाशकरं दिव्यं सर्वाऽशुभविनाशनम्।

शुभदं स्मरणात् पुण्यं त्राहि माम् दुःखनाशन।।2।।

**श्री भैरव उवाच—**

कवचं श्रृणु वक्ष्यामि भैरवि प्राणवल्लभे।

पठित्वा धारयित्वां तु त्रैलोक्ये विजयी भवेत्।।3।।

ऊँ अस्य श्रीबगलामुखी कवचस्य नारद ऋषिः, अनुष्टुप् छन्दः श्री बगलामुखी देवता, लं बीजं, ईं शक्तिः, ऐं कीलकम्, पुरूषार्थ चतुष्टये जपे विनियोगः।

शिरो मे बगला पातु ह्रदयमेकाक्षरी परा।

ऊँ ह्रीं (ह्लीं) ऊँ मे ललाटे च बगला वैरिनाशिनी।।4।।

गदाहस्ता सदा पातु मुखं मे मोक्षदायिनी।

वैरिजिह्वाधरा पातु कण्ठं मे बगलामुखी।।5।।

उदरं नाभिदेशं च पातु नित्यं परात् परा।

परात् परतरा पातु मम गुह्यं सुरेश्वरी ।।6।।

हस्तौ चैव तथा पातु पार्वती परिपातु मे।

विवादे विषमे घोरे संग्रामे रिपुसंकटे।।7।।

पीताम्बर धरा पातु सर्वाड.ंग शिवनर्तकी।

श्री विद्या समयं पातु मातड.गी पूरिता शिवा।।8।।

पातु पुत्रं सुतां चैव कलत्रं कालिका मम।

पातु नित्यं भ्रातरं मे पितरं शूलिनी सदा।।9।।

रन्ध्रे हि बगलादेव्याः कवचं मन्मुखोदितम्।

न वै देयममुख्याय सर्वसिद्धि प्रदायकम्।।10।।

पठनाद् धारणादस्य पूजनाद् वाञ्छितं लभेत्।

इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम्।।11।।

पिवन्ति शोणितं तस्य योगिन्यः प्राप्य सादराः।

वश्ये चाकर्षणे चैव मारणे मोहने तथा ।।12।।

महाभये विपतौ च पठेद् व पाठयेत् तुयः।

तस्य सर्वार्थसिद्धिः स्याद् भक्तियुक्तस्य पार्वति।।13।।

**श्री रूद्रयामले श्री बगलामुखी कवचम् समर्पयामि**

('साधक मण्डल' पटना द्वारा प्राणवन्त यह कवच साधकों के समस्त सांसारिक और आध्यात्मिक विपत्तियों के निवारण हेतु समर्थ है। स्नान के पश्चात् इस कवच का एक बार प्रतिदिन पाठ करें। माँ पीताम्बरा अविलम्ब सहायता प्रस्तुत करेंगी।) – सम्पादक मण्डल